# संस्कृतव्याकरणस्येतिहासः

पर्वः – ०३

पाणिनीय-सम्प्रदायः

# कात्यायनः

- कथासरित्सागरानुसारं कात्यायनः पणिनेः समकालीनः एव तस्य सहाध्यायी इति ।
- पाणिनेः सूत्राणामुपरि संस्कारं कृत्वा तेन ‘**वार्तिकम्**’ विरचितम्।
- “उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।

  तं ग्रन्थं वार्तिकं प्रहु र्वार्तिकज्ञा मणीषिणः।।”
- प्रायः चतुःसहस्रात्मकानि वार्तिकानि प्राप्यते।
- तस्याविर्भावकालः पाणिनितः द्विशतवर्षपरम्। स खलु दाक्षिणात्याधिवासी आसीत् मन्ये।
- केचन मन्यन्ते वररुचिः एव कात्यायनः।

# पतञ्जलिः

- अष्टाध्याय्याः सूत्राणां वार्तिकानां च उपरि भाष्यं विरचितं तेन। कृतस्य ग्रन्थस्य नाम 'महाभाष्यम्' इति। सुविशालम् इदम्।
- "सूत्रस्थं पदमादाय पदैः सूत्रानुसारिभिः।

  स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।"
- ग्रन्थे आत्मानं पतञ्जलिना 'गौणर्दीयः' इति कथ्यते। तस्माद् स 'गोनर्द'-देशस्य अधिवासी इति मन्यते। गोनर्दः अधुना अयोध्यासंलग्नं 'गोण्ड'-नामकं स्थानम्। अतः स पूर्वभारतीयः।
- तस्याविर्भावकालः ख्री.पू. द्वितीयशतकं मन्यते। केषाञ्चिन्मते योगसूत्रविरचितः पतञ्जलिः महाभाष्यकृतः पतञ्जलिः एकः एव।
- महाभाष्यम् ८४ आह्निकेषु विभक्तम्।
- पतञ्जलिः पाणिनेः सूत्रपरिपूरकं किञ्चित् भाष्यं लिखितवान्। या 'इष्टिः' कथ्यते।

# भर्तृहरिः

- ख्रीष्टीय-पञ्चमशतके मुनेः भर्तृहरेः आविर्भावकालः ।
- विरचितस्य ग्रन्थस्य नाम ‘वाक्यपदीयम्’।
- तत् पुनः काण्डत्रये विभक्तम्। ‘आगमकाण्डः’, ‘वाक्यकाण्डः’, ‘पदकाण्डः’ च ।
- व्याकरणस्य दार्शनिकः ग्रन्थः एषः।
- भर्तृहरिः महाभाष्यस्य उपरि ‘महाभाष्यदीप्तिः’ इति एकं टीकाग्रन्थम् अलिखत्।

# पाणिनीयव्याकरणस्य उपरि कृताः विविधाः ग्रन्थाः

## ‘काशिका’

- आचार्यः जयादित्यः आचार्यः वामनः च ।
- वृत्तिग्रन्थः एषः । सूत्रार्थप्रधानग्रन्थवृत्तिः । सूत्रक्रमे विरचिता ।
- काशिकायाः उपरि पुनः टीकाद्वयम् उपलभ्यते ।
- ‘काशिकाविवरणपञ्जिका’ – आचार्यः जिनेन्द्रवुद्धिः। ग्रन्थस्य अपरः नाम ‘न्यासः’ इति।
- ‘पदमञ्जरी’ – पण्डितः हरदत्त-मिश्रः।

# ‘महाभाष्यप्रदीपः’, ‘महाभाष्यप्रदीपोद्योतः’

- पतञ्जलेः महाभाष्यस्योपरि कैयटः ‘प्रदीप’-नाम टीकां लिखितवान्।
- कैयटस्य प्रदीपस्य उपरि नागेशभट्टः **‘महाभाष्यप्रदीपोद्योतः’**-नाम टीकां लिखितवान्।

# दुर्घटवृत्तिः

- लक्ष्मणसेनस्य सभाकविः आचार्यः शरणदेवः अलिखत् ।

# प्रक्रियाकौमुदी

- वैयाकरणः रामचन्द्रसूरिः - रचयिता ।
- प्रथमप्रक्रियानुक्रमः ग्रन्थः ।
- आचार्यः **विट्ठलः** पुनः अस्याः उपरी ‘प्रसादः’ नाम टीकां लिखितवान्।

# वैयाकरणसिद्धान्तकौमुदी

- आचार्यः भट्टोजिदीक्षितः – रचयिता । प्रक्रियाक्रमः ।
- ग्रन्थस्योपरि स्वरचिता टीका - ‘प्रौढमनोरमा’।
- भट्टोजिदीक्षितः अष्टाध्याय्याः उपरि ‘शब्दकौस्तुभ’-नाम्नीं वृत्तिं लिखितवान्।

**वैयाकरणसिद्धान्तकौमुद्याः टीकाग्रन्थाः**

- ‘वालमनोरमा’ – वासुदेवदीक्षितः। ‘तत्त्ववोधिनी’ – ज्ञानेन्द्रसरस्वती।
- ‘वृहच्छब्देन्दुशेखरः’, ‘लघुशब्देन्दुशेखरः - नागेशभट्टः’।
- ‘सिद्धान्तरत्नाकरः’ – रामकृष्णभट्टः।

# अष्टाध्याय्याः उपरि विरचाताः अपराः वृत्तिग्रन्थाः

- ‘रूपावतारः’ – धर्मकीर्तिः।
- ‘रूपमाला’ – विमलसरस्वती।
- ‘मिताक्षरा’ – अन्नंभट्टः।
- ‘भाषावृत्तिः’ – पुरुषोत्तमदेवः।
- ‘प्रक्रियासर्वस्व’ – नारायणभट्टः।

# धन्यवादः